ISSN: Under Process| Vol. 1 Issue. 1 | September 2021 | Frequency: Biannual

अभिनवधारा
ABHINAVDHARA
International Journal of Innovation in Indic Studies
www.ijiis-org.com

# प्राच्यपाश्चात्यदृशा स्वप्नविश्लेषणम्

R.G.Murali Krishna
Professor / Deputy Didector ( ADMIN )/ CPIO
Central Sanskrit University, New Delhi

Received: 15/08/2021 | Accepted: 16/08/2021 | Published: 07 /09/2021

## भूमिका

**वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।**
**अन्तःस्थानात्तुभावानां संवृतत्वेन हेतुना ॥**[1]
रूपं मे भगवन्मन्त्रा विज्ञेया मूर्तयोऽमलाः।
जाग्रत्स्वप्नौ सुषुप्तिश्च तुर्यं चेति चतुष्टयम् ।।
ज्ञेयं पदाध्वनो रूपं जाग्रद्बाह्येन्द्रियक्रमः।
बाह्येन्द्रियाणां तमसाभिभूते विभवे सति ।।
अन्तःकरणवृत्तिर्या संस्कारपरिशेषिणी।
सा स्वप्न इति विज्ञेया तदभावे सुषुप्तिका ।।[2]

कोऽयं स्वप्नः? किं तस्य स्वरूपमम् ? द्रष्टा कः? किमर्थमेषैव स्वप्नः मया अनुभूतः? किं फलं स्यादस्य स्वप्नस्य ? अयं शुभस्वप्नो वा दुःस्वप्नः? प्रायः वर्तमाने जायमानः सन्दर्भः मया कादचित् स्वप्ने दृष्टपूर्व इति प्रतिभाति इत्याद्यनेकजिज्ञासानां समाधानरूपात्मकोऽयं ग्रन्थ इति प्रतिजाने । "स्वस्मिन् स्वीयभ्रमणं स्वप्नः" इति शाब्दिकर्थानुसारेण स्वप्ने दृश्यमानं सर्वमस्मत्सम्बद्धमेव भवति अतः स्वप्ने वैज्ञानिकता विद्यत इति प्रतीयते । कोऽपि स्वप्नः निष्प्रयोजकः न भवति । फ्रायिड् (Freud) महोदयात्प्रभृति अद्य यावत् सर्वे पाश्चात्याः स्वप्ने मनोवैज्ञानिकतां न्यरुरूपन् । परन्तु भारतीयाः मन्त्रद्रष्टारः ऋषयः बहोत् कालात् प्रागेव स्वप्नविषये विशेषप्रयोगं चक्रुः तथा स्वप्नसिद्धान्तान् च प्रतिपादयामासुः।

---

[1] माण्डूक्य. उपनिषत् कारिका

[2] लक्ष्मीतन्त्रम्- अ. 22 : 22-24

**मूल विषयः**

स्वप्नस्य दार्शनिक-सैद्धान्तिकपक्षाणां स्वरूपनिरूपणमत्र विहितम्। किन्तु स्वप्ने विद्यमानस्य विषयवस्तुनः प्रायोगिकं निरूपणमधुना यावद् न केनापि न्यरूपीति शोचनीयांश एव । परं प्रायोगिकरूपेण स्वप्नस्य वैज्ञानिकतायाः सम्पादनमत्यन्तं कठिनम् उत असम्भवमिति मन्ये। यतः प्रत्येकं मनुष्यस्य परिवेशः, अनुभवाः, स्थानविशेषाः इच्छाः चिन्तनप्रक्रियाः सर्वदा सर्वथा भिन्ना एव भवन्ति तथा प्रायः स्वप्ने अनुभूतः विषयः 90% विस्मृतः भवति । स्वप्ने अनुभूतस्य विषयस्योपस्थापने स्मरणे अधिकाः असमर्थाः भवन्ति । यद्यपि स्वप्नविषयस्य पुनस्स्मरणं स्वप्नद्रष्ट्रा क्रियते तथापि कदाचित् केचन कल्पितविषयाः अपि तेन कथ्यन्ते । तस्मात् स्वप्नस्य विश्लेषणं न सर्वजनसुलभसाध्यं वर्तते । तदर्थं परिश्रमः अपेक्षितः भवति ।

जाग्रत्-स्वप्न-सुषुप्तिः इति त्रयः अवस्थाः उपनिषत्सु प्रोक्ताः विद्यन्ते । यद्यपि तुरीयावस्था इति निरूपिता चतुर्थावस्था भारते सर्वतोमुखविकासावस्थारूपेण प्रसिद्धा तथापि पाश्चात्यानां सिद्धान्तैः सह तुलनया अवस्थात्रयमेव सुप्रसिद्धं विद्यते । माण्डूक्योपनिषदि स्वप्नस्य वैज्ञानिकता निरूपिता । वेदादिष्वपि स्वप्नविश्लेषणं दृश्यते यथा -

**विद्म ते स्वप्न जनित्रं ग्राह्याः पुत्रोऽसि यमस्य करणः ।**

**विद्म ते स्वप्न जनित्रं निर्ऋत्याः पुत्रोऽसि यमस्य करणः । .... ।**[3]

मन्त्रेऽस्मिन् स्वप्नः **ग्राह्याः पुत्रः** [ग्राही-शब्दस्य अर्थः ग्रहणं यः करोति सः अर्थात् आत्मा (ज्ञानाधिकरणमात्मा) दृष्टानां श्रुतानां च विषये स्वप्नः जायते], **निर्ऋत्याः पुत्रः**[निर्ऋतिः नाम गतिशून्यता अर्थात् निद्रायां Rapid Eye Movement भवति यदा तत्र गतेः अवरोधः भवति तदा स्वप्नः जायते । अतः निद्रायाः गतेः अवरोधे सति स्वप्नः जायेत तस्मात् निर्ऋतेः पुत्रः इति वक्तुं शक्यम्], **अभूत्याः पुत्रः**[भूतिः नाम ऐश्वर्यं यस्य ऐश्वर्यं नास्ति अर्थात् कस्यचित् पुरुषस्य अनैश्वर्यकारणात् यदि इच्छाः सम्पूरिताः न भवन्ति तदा दमितेच्छाभिः सः स्वप्नं पश्यति], **देवजाभीनां पुत्रः [**एकस्मिन् नाभौ जन्म येषाम् अर्थात् देवासुरौ अतः सन्दर्भेऽस्मिन् आसुरीप्रवृत्तेः कारणतः दुःस्वप्नाः जायन्ते । अन्यथा अमरकोशानुगुणं जाभिः नाम स्वसृकुलस्त्रियः इति अर्थं स्वीकृत्य देवानां सहोदरी इति विशेषार्थेन इन्द्रियैः समुत्पद्यते इति स्वीक्रियते**]**, **पाप्मनः पुत्रः**[पापं नाम जन्मजन्मान्तरसंस्कारः अर्थात् पूर्वजन्मसंस्काराणां पुनस्स्मरणं स्वप्नः भवति**]**, **वरुणस्य पुत्रः**[वारुणानी नाम अपानवायुः तेन मानसिकदुष्प्रवृत्तिः जयते तद्वारा दुःस्वप्नाः जायन्ते], **साम्नः पुत्रोऽसि रात्र्याः अभिजातः [**साम्नः अर्थात् शान्तिः । जाग्रदवस्थायां स्वैरकल्पना अन्तर्मानसिकज्ञानस्य (Endo Psychic Sensor) नियन्त्रणे तिष्ठति । निद्रावस्थायां तस्य शान्त्या स्वप्नावस्थायां स्वैरकल्पना साकारात्मिका भवति । सर्वं वास्तविकमिति प्रतिभाति**]** इत्यादिरूपेण स्वप्नस्य जन्मनः वर्णनं वेदेषु दृश्यते ।

Oneiros – इति ग्रीक्-भाषाशब्दादुत्पन्नस्य Dreams इति स्वप्नार्थकस्य स्वप्नशास्त्रस्य अध्ययनं Oneirology इति कथ्यते। "चतुरशीतिलक्षयोनिषु जन्मानन्तरं मनुष्यजन्मलभ्यते।" अत "प्राग्जन्मसंस्काराणां पुनस्स्मरमणेव स्वप्रः" इति प्रतीतिः । तस्मादेव जन्मना अन्धाः अपि पूर्वजन्मसंस्कारवशात् स्वप्नमनुभवन्तीति

3 अथर्ववेदः काण्डम् -16.5

भारतीयाः अभिप्रयन्ति। आत्मशक्तितुल्यशक्त्ययुक्तं शरीरम् अद्भुतकार्यकरणे अक्षमं भूत्वा स्वप्नद्वारा सर्वं संसाधयतीति पश्चात्यदार्शनिकाः वदन्ति। स्वप्नविषये अवगन्तव्यं चेत् कतिपयाः प्राच्यपाश्चात्य विचाराः परिभाषाः च अवगन्तव्याः अतः अत्र प्रस्तूयन्ते -

प्रसुप्तस्य विज्ञानं स्वप्नः[4] स्वप् धातोः स्वपो नन् [5]इति सूत्रेण नन् प्रत्यये सति निष्पन्नस्य स्वप्नशब्दस्य अर्थाः निद्रा, शयन, स्वाप, संवेग, तन्द्रा इत्यादयः सन्ति । मानसिकज्ञानभेदे इति वाचस्पत्ये लिखितम् । दर्शनमिति मेदिनीकेशे प्रोक्तम् ।

सुप्तावस्थायां मानसिकप्रतिक्रियाः निरन्तरं चलन्ति तथा स्वप्नः तासां क्रियाणामेका नैरन्तर्यप्रक्रिया भवति । (There is a continuity of mental activities during sleep and a dream is merely a phase of this continuity of activities - Fisher, V.E.)[6]

अचैतन्यावस्थां प्रति गन्तुं स्वप्नः एकः सुमार्गः (Dream is the royal road to the unconscious - J.D.Page)

स्वप्नाः विभ्रमाः भवन्ति । येषामनुभवः प्रत्येकं रात्रौ जायते परं यदा तद्विभ्रमस्यार्थावगमनं जायते तदा स्वप्नः स्पष्टः भवति । (Dreams are hallucinations which we all experience every night. When we awake their hallucinatory nature is quite obvious to us- Brown, J.F)[7] । अमुमेव उद्देश्यं शङ्करभगवत्पादाः अपि ऊचुः । तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति। तत्र तावत् प्रतिपाद्यते। सन्ध्ये सृष्टिरिति। सन्ध्ये इति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् । “स्वप्नदृष्टपदार्थस्य मायामात्रत्वम्” शा॰ सू॰ भाष्ययोर्व्यवस्थापितं यथा “सन्ध्ये सृष्टिराह हि” सू॰[8]। सन्ध्ये = स्वप्ने श्रूयमाणा सृष्टिः जीवकृता । अत्र श्रुतिरेवमाह “अथ रथान् रथयोगान् पथः सृजते” इति ।



[4] चरकसंहिता।

[5] अष्टाध्यायी 3.3.91 ।

[6] Fisher, V.E. : An Introduction to Abnormal Psychology, p.403.

[7] Brown, J.F. : The Psychodynamics of Abnormal Behaviour, P.221.

[8] ब्र.सू.३.२.१

**स्वप्नप्रकाराः [Types of Dreams]**

**वाग्भटे प्रोक्ताः स्वप्नभेदाः** - आयुर्वेदानुगुण्येन स्वप्न: सप्तप्रकारक: यथा –

दृष्ट: श्रुतोऽनुभूतश्च प्रार्थित: कल्पितस्तथा।

भाविको दोषजश्चेति स्वप्न: सप्तविधो मत:॥[9]

तेषु आद्या: पञ्च निष्फला:। भाविकदोषजौ सफलौ। रोगनिर्धारणे दोषत्रयस्य स्वप्नेन सह इत्थं सम्बन्ध: अनुबुध्यते । यथा वातप्रकृतेर्वातज: स्वप्न:। पित्तप्रकृते: पित्तज: एवं कफेति वाच्यम्।

**दृष्टः -** जाग्रदवस्थायां यः विषयः मनुष्यो वा अस्माकं जीवने दृष्टः सः स्वप्ने तथैव अथवा अन्यथा वा दृश्यते ।

**श्रुतः-** अन्यैरुक्तविषयः कदाचिददृष्टपूर्वः अपि श्रुतविषयानुगुणं स्वप्नः दृश्यते । प्रायः श्रुतस्वप्ने चित्रं न दृश्यते सर्वम् आकाशवाणीव श्रूयते ।

**अनुभूतः-** जाग्रदवस्थायाम् अनुभूतान्विषयान् स्वप्ने पश्यति चेत् अनुभूतस्वप्न इति कथ्यते ।

**प्रार्थितः** - याः इच्छाः दमिताः भवन्ति ताः स्वप्ने दृश्यन्ते तर्हि प्रार्थितस्वप्नः ।

**कल्पितः**- यान् विषयान् वयं जाग्रदवस्थायां द्रष्टुं न शक्नुमः ते स्वप्ने दृश्यन्ते चेत् कल्पितस्वप्नः ।

**भाविकः**- भविष्यविषयाः अधुना स्वप्ने आस्वाद्यन्ते चेत् भाविकः । यथा स्वप्नागमनात् कतिपयदिनानन्तरं स च विषयः जाग्रदवस्थायां प्रत्यक्षरूपेण संपश्यते तर्हि भाविकः ।

**दोषजः** - वात-पित्त-कफानां विकृतिकारणात् यः स्वप्नः अनुभूतः स दोषजः ।

इत्थं सप्तप्रकारकस्वप्नाः भारतीयैः प्रतिपादिताः । तथैव पाश्चात्यैः एतदतिरिच्य नूतनः विषयः कोऽपि न प्रकाशितः ।

**वर्धमानसूरिविरचिते स्वप्नप्रदीपे स्वप्नः चतुर्विधः प्रोक्तः** -

स्वप्नश्चतुर्विधः प्रोक्तो दैवः स्वानुभवप्रजः ।

धातुप्रकोपजश्चैव चित्तोद्भूतश्चतुर्थकः ।।

द्वावाद्यौ सफलावन्यौ निष्फलौ दौ दिवानिशम् ।।

वस्तुतः पाश्चात्याः अचैतन्यमनसि विद्यमानानां दमितेच्छानाम् अभिज्ञानार्थं प्रयतन्ते परं भारतीयाः स्वप्नविश्लेषणापेक्षया ब्रह्मतत्त्वस्याभिज्ञानार्थं प्रयत्नं विदधुः ।

**स्वप्नस्य स्वरूपम् -**

---

9 अष्टाङ्गहृदये शारी. 6/61

**स्वप्नदृक् प्रचरन् दिक्षु वैदशासु स्थितान् ।**

**अण्डजान् स्वेदजान् वापि जीवान् पश्यति यान् सदा ।।[10]**

सर्वेऽपि जाग्रति स्वपन्ति च । स्वप्नः सर्वैरनुभूयते । सुखदुःखाद्यनन्तभावनानां समुदितस्वरूपः स्वप्नः। अत एव 'प्रसुप्तस्य विज्ञानं स्वप्नः'[11] (Dream is Science of unconscious) इति प्राच्यामभिमतम् । असम्पूरितेच्छानां दमितभावानां च परिपूर्तिः स्वप्ने एव जायते । यद्यपि स्वप्नः काल्पनिकः इति भाति, तथापि सः आत्मप्रत्यक्षविषयः । अत एव एकेन स्वप्ने आनन्दः अनुभूयते । अपरः भयेन जागर्ति । एकत्र अस्माभिः स्वप्नेन सह सम्बन्धः अनुबुध्यते तद्वैरुध्यम् अपरत्र । तदा तदा वर्तमाने प्रत्यक्षीभूतसन्दर्भः स्वप्ने मया दृष्टपूर्व इति प्रतिभाति । अपि च जन्मना अन्धाः अपि "स्वप्नः मया अनुभूयते" इति कथयन्ति । अत अनादिकालादारभ्य सर्वे स्वप्नस्वरूप-रहस्यावगमन-जिज्ञासवः दृश्यन्ते ।

जिज्ञासूनाम् अनुभवाधारैः प्रयोगैश्च बहुभिः दार्शनिकैः विद्वद्भिः मनोवैज्ञानिकैश्च विभिन्नप्रकारकस्वप्नसिद्धान्ताः समुल्लिखिताः । तत्र भारतीयोपनिषदद्रष्टारः अग्रेसराः । मनोवैज्ञानिकजगति फ्रायिड् (Freud) महोदयस्य आगमनात् प्राक् प्राच्यपाश्चात्यस्वप्नविचारधाराः दार्शनिकदृक्पथमनुसृताः आसन् । अर्थात् विंशशताब्द्यां (1900) The Interpretation of Dreams इति फ्रायिड् (Freud)-महोदयस्य अभूतपूर्वस्वप्नविश्लेषणद्वारा नव्यवैज्ञानिकपथमनुसृताः अभवन् पाश्चात्यानां स्वप्नसिद्धान्ताः । तेन नैकविधक्षेत्राणि प्रभावितानि । विशिष्य मानसिकरोगिणां चिकित्सायै शिक्षाक्षेत्रे छात्र-अपसामान्यगतसमस्यानाम् अभिज्ञानाय तासां दूरीकरणाय च इदं स्वप्नविश्लेषणं महदुपकरोति । न केवलमध्यापकैः मनोवैज्ञानिकैश्चापि ज्ञातव्यविषयोऽयं परं ये स्वप्नदृशः ते सर्वेऽपि अत्र अधिकारिणः एव ।

### सन्दर्भ ग्रन्थः


ददार एवं सी.एल. गोस्वामी, कल्याण गीता-तत्वांक, गीता प्रेस गोरखपुर


[10] माण्डू. उप. / आ. शा. प्र/ 63

[11] चरकसंहिता ।